श्रीयोगीश्वरयाज्ञवल्क्यमङ्गलशासनम्

{॥ श्रीयोगीश्वरयाज्ञवल्क्यमङ्गलाशासनम् ॥}

॥ श्रीगुरुभ्यो नमः ॥

॥ ॐ श्रीमहागणाधिपतये नमः ॥

॥ श्रीमच्चरणवैभवायै नमः ॥

॥ श्रीयोगीश्वर-याज्ञवल्क्य-मङ्गलाशासनम् ॥

ब्रह्मरात-महायोगि-बृहत्-सुकृत-मूर्तये ।
सुनन्दा-सुतरत्नाय सानन्दायास्तु मङ्गलम् ॥ १॥

जननी-जठर-प्राप्त-जलजाक्ष-दयोदयः ।
योऽभूत् परात्मवेत्तास्मै याज्ञवल्क्याय मङ्गलम् ॥ २॥

कृपागुरुर्गुरुर्यस्य ह्यकरोदुपनायनम् ।
वृद्धव्यास-प्रसादात्त-वैदुष्यायास्तु मङ्गलम् ॥ ३॥

वैशम्पायन-प्राप्ताद्दक्-वृजिनच्छेद-शक्तये ।
वैदेह-वसुधानाथ-वन्दनीयाय मङ्गलम् ॥ ४॥

मैथिलास्थ-नगरस्थूणा-मञ्जुपल्लव-कारिणः ।
मन्त्राक्षताः बभुर्यस्य माननीयाय मङ्गलम् ॥ ५॥

Stotram Digitalized By Sanskritdocuments.org

वैशम्पायनतोऽधीतं ववाम यजुरुज्ज्वलम् ।
यस्सभायां तपोभाजां योगिवर्याय मङ्गलम् ॥ ६॥

स्वशक्ति-ख्यापनोद्युक्त-सप्तसैन्धवशासनात् ।
आहर्त्रे बडवाश्वानां अर्कशिष्याय मङ्गलम् ॥ ७॥

अयातयाममाम्नायं आम्नायवपुषो हरेः ।
अध्यैष्ट यो मुनिस्तस्मा अक्षय्यं भूरि मङ्गलम् ॥ ८॥

यस्य चित्ररथः शिष्यो योगिनेतुःप्रसादतः।
कात्यायनीप्रियायास्मै कृपासाराय मङ्गलम् ॥ ९॥

मिथिलाधिपदत्ताग्रमाननाय महात्मने ।
आहर्त्रे सौरभेयीनां अध्वरान्तेस्तु मङ्गलम् ॥ १०॥

पितामहमनःपुत्रीपरिणेत्रे पटीयसे ।
शान्तोद्दालकगर्वाय शान्तिसाराय मङ्गलम् ॥ ११॥

दर्भ-स्तम्भ-हृत-ग्रीव-दृप्त-शाकल्य-जीवनम् ।
चकार यः प्रभावेन चित्रचर्याय मङ्गलम् ॥ १२॥

इति माङ्गलिकैः श्लोकैः

उपनदतः कण्वमुख्यसच्छिष्यान् ।

अनुगृह्णन् शुक्लयजुः-

शाखाचार्यो मुनीश्वरो जयति ॥ १३॥

॥ शुभमस्तु ॥

Encoded and proofread by

K Kalyanaraman srimatha12@gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Yogiswara Yagnavalkya Mangalasasanam Lyrics in Devanagari PDF
% File name : yAGYavalkyamangala.itx
% Location : doc_deities_misc
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : K Kalyanaraman srimatha12 at gmail.com
% Proofread by : K Kalyanaraman srimatha12 at gmail.com
% Description-comments : 12 Mangala Slokas and one Phala Sruti Sloka singing the praise of Sage Sri Yagnavalkya
% Latest update : November 29, 2008
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 16, 2015] at Stotram Website